॥ श्री ॥
अथ श्री त्रिविक्रमपंडिताचार्यसुत श्री नारायणपंडिताचार्यविरचितः
॥ श्री मध्वविजयः ॥

१०. दशमः सर्गः
सपदि समस्कुरुत भृशं माधवगुणसाधकोऽथ मध्वरविः ।
भृगुकुलतिलकस्थानं तापकरः पापपांथानाम् ॥ १०.१ ॥

दशमतिशिश्यः कश्चित्शुभजनतायै कुतूहलनतायै ।
विविधसुवृत्तं वाक्यं काव्यमिवोचे सनायकस्तवकम् ॥ १०.२ ॥

भुवनाद्भुतमध्वचेश्टितं न वदेमापि सुरायुशा वयम् ।
सकलं खलु किंतु किंचिदप्यथ शुश्रूशुजनाय वर्ण्यते ॥ १०.३ ॥

क्वचिदीश्वरदेवमेश भूपं खननं पांथजनंविधापयंतम् ।
स्वमपि प्रतिचोदयंतमूचे क्रियया नोऽकुशलान् प्रबोधयेति ॥ १०.४ ॥

प्रकारं प्रकटीकर्तुम् आरभ्य विरराम नो ।
महीयोमतिमाहात्म्याद् वैवश्येन खनन् खलः ॥ १०.५ ॥

नानेनेनानेनानेनोनूनेन ननु नुन्नाः ।
नानाना नो नूनं नानेनानूननाऽनुन्नः ॥ १०.६ ॥

यमशेषभवप्रभवः स्मरतामसुखाब्धिरपैति न चित्रमिदम् ।
मरुतीदृशि भांति हि यत्स्तवने यमशेषभवप्रभवः स्मरताः ॥ १०.७ ॥

संचरन्नंचनीयः कदाचिद् विभुः विष्णुपद्यास्तटं वैष्णवाग्रेसरः ।
प्रापदाप्तैर्निजैरेष शिष्यैर्वृतः त्यक्तविश्वप्लवं शात्रवातंकतः ॥ १०.८ ॥

इमान् स्वस्वपूर्वाश्रयानात्मवाक्यात् सलीलं दयालुः स मूलाश्रयात्मा ।
निषेद्धूननादृत्य चानन्यलंघ्यां तदाऽत्याययत् तां नदीं संसृतिं वा ॥ १०.९ ॥

वारयतवारयत वैरिसुहृदोऽमून् मारयतमारयत पारगमनात् प्राक् ।
आपतत आलपत इत्यवददुच्चैः स त्वरकराजपुरुषानुचितवाचा ॥ १०.१० ॥

न जडा जले पतत साहसादहो न भयं हि वो बहुतयाऽबहोर्जनात् ।
भवतां पतिं क्षितिपतिं दिदृक्षवः प्रतियाम केन कलहं चिकीर्षथ ॥ १०.११ ॥

वचसेत्यनेन स परान् न्यरुणद् भुजगान् नरेंद्र इव मंत्रबलात् ।
उदतारयत् परिजनं मृतिभीसरितश्च देवसरितश्च समम् ॥ १०.१२ ॥

निर्विकारचरितोऽपि परीतः क्रूरकिंकरसहस्रतयेन ।
स व्रजन्नुदलसज्जगदीशः सिंहराडिव सृगालसमूहे ॥ १०.१३ ॥

अप्रकंप्यवपुषं सुरासुरैः सिंहसंहननमेनमुन्नतम् ।
प्राप्तमात्मनगरांतिकं नृपः प्रेक्ष्य सौधशिखरे स्थितोऽब्रवीत् ॥ १०.१४ ॥

रिपुनृपप्रणिधिप्रतिशंकया पथिकपाटनकर्मणि दीक्षितैः ।
सुमुख मे पुरुषैः परुषैः कथं यमभटैरिव नासि विहिंसितः ॥ १०.१५ ॥

अप्लवदेवनदीतरणं ते हंत कथं च चिकीर्षसि किं त्वम् ।
तं निगदंतमितिप्रभृतीह स्माऽह महापुरुषोत्तमदासः ॥ १०.१६ ॥

योऽसौ देवो विश्वदीपः प्रदीप्तः कुर्मः सर्वं तत्परानुग्रहेण ।
यामस्तावत् तूर्णमाशामुदीचीम् इत्याद्यं तद्भाषया चित्रवाक्यम् ॥ १०.१७ ॥

गांभीर्यं धृतिमुरुवीर्यमार्यभावं तेजोऽग्र्यं गिरमपि देशकालयुक्ताम् ।
राजाऽस्य स्फुटमुपलभ्य विस्मितोऽस्मै राज्यार्धं सपदि समर्पयांबभूव ॥ १०.१८ ॥

दंडार्हबुद्धिविषयो नृपपूरुषाणां
राज्यार्हबुद्धिविषयोऽभवदित्थमेषः ।

नीतिं प्रकाशयितुमेव विपत्सु कार्यां गंतुं
प्रभुः प्रसभतोऽपि तथा व्यधात् सः ॥ ।१०.१९ ॥

कदाचिच्चोराणां निकरमवलोक्याभिपततां
अवस्थाप्य स्वीयान् करगपटपिंडार्थमतिकृत् ।
चरन्नेतेष्वेतानथ मिथ इहाघातयदहो
विभुः सम्मोह्य प्राग् विजय इव संशप्तकगणान् ॥ १०.२० ॥

अन्यत्र च चोरान् धन्यप्रवरोऽसौ शूरान् शतसंख्यान् प्राप्तान् स्वजिघांसून् ।
ऐकेन तु शिष्येणाऽकृष्टकुठारान् निस्ताडितयूथ्यानद्रावयत द्राक् ॥ १०.२१ ॥

क्वचिच्छिला च्छटाभ्रमादमुं ससंघमत्यजन् ।
अवेक्ष्य दस्यवः पुनः कुतूहलात् तमानमन् ॥ १०.२२ ॥

सत्योच्छेदे सेच्छापातं व्याघ्राकारं दैत्यव्याघ्रम् ।
प्राळेयाद्रेः प्रांते प्राज्ञः पाणेर्लीलालेशेनाऽउय्स्यत् ॥ १०.२३ ॥

प्राप स नारायणतः शुद्धशिलात्मप्रतिमाः ।
यासु स पद्मासहितो दोष्यहितः सन्निहितः ॥ १०.२४ ॥

पाराशर्यः परतत्वप्रसिद्ध्यै तात्पर्यार्थं परमं भारतस्य ।
व्यक्तं वक्तुं नियुनक्ति स्म साक्षाद् ऐनं धन्यं भुवने मन्यमानः ॥ १०.२५ ॥

तीर्थेषु तीर्थेषु च सौख्यतीर्थः क्षेत्रेषु च क्षेत्रविदां वरिष्ठः ।
गोविंदमावंद्य सहानुगोऽगाद् गंगां पुनस्तुंगतरंगमालाम् ॥ १०.२६ ॥

प्लवैरपेतामवलोक्य सिंधुं सरोजबंधुं च तदाऽऽप्तसिंधुम्
तटे निषण्णानधिकं विषण्णान् निरीक्ष्य शिष्यानतरत् स ऐताम् ॥ १०.२७ ॥

न वानरेंद्रस्य विलंघिताब्धेः न वा नरेंद्रस्य विहर्तुरस्याम् ।
इमेऽस्मरंस्तद्वपुषोऽन्यथाऽस्य शक्तस्य शंक्येत विपत् कथं तैः ॥ १०.२८ ॥

जगत्प्रदीपायितगोगणाढ्ये दिवाकरे मध्वदिवाकरे च ।
अव्यक्तरूपे श्रियमत्यजन् द्राक् सहांबुजैस्तन्नयनांबुजानि ॥ १०.२९ ॥

पदं पशोर्वा विनतातनूजः तीर्त्वा नदीं तावददीनसत्त्वः ।
अनार्द्रवासाः स कुतूहलार्द्रैः नृदेवभूदेवमुख्यर्ववंदे ॥ १०.३० ॥

भीतैररातेरतिमात्रमत्र नतारकैरप्यथ तारकैः सः ।
स्वतेजसा विस्मितभूपनुन्नैः प्लवेन शिष्यान् निरतारयत् ताम् ॥ १०.३१ ॥

विशंकटं स्वस्तटिनीतटं ते दीपप्रदीप्तं जनताभिपूर्णम् ।
संचोदयत्पंडितमंडलाढ्यं नाथावलोकोत् कहृदोऽभ्यपश्यन् ॥ १०.३२ ॥

आम्नायमाम्नायविदां विदग्धं सभावभेदं प्रवदंतमत्र ।
दैव्यां सभायामिव पद्मयोनिं प्रैक्षंत साक्षात् सुखतीर्थमेते ॥ १०.३३ ॥

प्राप्तस्ततो हस्तिनराजधानीं मासानुवासेह स वासयोग्यान् ।
मठांतरेऽनंतगुणांतरः सन् ऐकांतदेशे सरितोऽसमीपे ॥ १०.३४ ॥

भित्त्वा भुवं देवनदी जगाम शाखाविशेषेण निषेवितुं तम् ।
वाणी च यत्प्रेष्यतया कृतार्था शिवादिवंद्या न तदत्र चित्रम् ॥ १०.३५ ॥

गुरुप्रबर्हस्य पदारविंदं विदूरतः सा प्रणनाम मूर्ता ।
औदार्यसौंदर्यतनुं तनुं तां आलक्ष्य शिष्यैरतिविस्मितं तैः ॥ १०.३६ ॥

तेनोपयातेन कदाचनाथ वाराणसीं पापनिवारणेन ।
अवादि वाणी बलिनः स्वशिष्यान् विलोक्य लीलावसरेऽवलिप्तान् ॥ १०.३७ ॥

नियुद्धसिद्ध्यै युगपद्धि वीरम् मन्या भवंतोऽभिपतंतु मां द्राक् ।
समस्तशक्तिं न युनक्ति यः स्वां अत्रास्मदाज्ञां स निराकरोति ॥ १०.३८ ॥

इतीरयन् पंचदशैष यूनः प्राप्तान् प्रयुद्धान् युगपन्निपात्य ।
उत्थीयतां यस्य समर्थता स्याद् इति ब्रुवाणः शनकैर्जहास ॥ १०.३९ ॥

सौमेरवं गौरवमावहंति तवांगमंगांगुलयश्च नोऽङ्गे ।
पुरा विनश्याम इतो दयालो स्वामिन् विमुंचेत्यवदंस्तदा ते ॥ १०.४० ॥

तेनाथ मुक्तैरतिविस्मयस्तैः अवाप्यनालोच्य हि तत्स्वरूपम् ।
यद्भ्रूविजृंभेण सशंभुशक्रं जगत् समस्तं नियतं निकामम् ॥ १०.४१ ॥

सदाक्ष्यमाक्षिप्तसमस्तपक्षको यतिः प्रभुं कोऽप्यमरावतीपदः ।
जिगीषया ज्ञानसहायकर्मणः प्रसाध्यतां साधनतेत्युदाहरत् ॥ १०.४२ ॥

संसाधितार्थे भगवत्ययुक्तिवित्
पप्रच्छ स ज्ञानपदार्थमुग्रधीः ।
ज्ञातः स ते ज्ञान्यसि चेन्न चेन्न स
प्रश्नो घटेतेति निराकृतैष तम् ॥ १०.४३ ॥

विततततमतमोऽन्तं साधयंत्या नितांतं
सदसिसदसि रेजे व्याख्यया व्यासशिष्यः ।
सकलसमयिहस्तांभोजबंधाभिनंदी
शरदिशरदि चंद्रश्चंद्रिकासंपदेव ॥ १०.४४ ॥

जननं समयेसमये जगतः प्रथिते समये समयेदमिते ।
सनिरासमयेऽसमये स्थितियुक् स्ववभासमयेऽसमयेष्टधिया ॥ १०.४५ ॥

वर्तस्वाध्यधि सर्वं दीव्येदं सोऽनिशं स्वतंत्रो विष्णुः
उज्जासय दुष्टानां संस्कुरु साधून् गुणाभिपूर्णोऽप्यगुणः ॥ १०.४६ ॥

असमोत्तमो मतोऽसौ श्रियःपतिर्विश्वतो विभिन्नात्मा ।
परमान् प्रकाममर्थान् प्रकाशयामास सेत्यादीन् ॥ १०.४७ ॥

समानया याऽनमाऽऽस मायया ततयाऽयमा ।
नयासना नाऽस या न यातनाऽललनाऽतया ॥ १०.४८ ॥

प्राज्ञो राज्ञां त्रिदिवपदवीं कौरवं क्षेत्रमाप्तः
सस्माराथ स्वविहृतिपतद्धस्तियुद्धोत्सवानाम् ।
सत्यात्माद्यैरिह परिवृतो भाविमारीचदृग्भिः विस्मेरैः स्वैर्निजनृपतनूहेतिदृष्ट्याऽतितुष्टैः
॥ १०.४९ ॥

विप्रात्मेशः क्षणार्थं कृतनतिरशितिश्रीर्हृषीकेशदेशे स्पष्टं दृष्टोऽप्यदृष्टः सपदि
विहितवान् विस्मयं देहभाजाम् ।
स्वप्ने स्वप्रेरितान्यस्थलगनिजनरोपाहृतैर्भक्ष्यभोज्यैः
प्राज्यैः प्राभोजयत् स्वं गुरुमखिलगुरुं वेदयन् वेदबंधुम् ॥ १०.५० ॥

अवाप्तवान् पुनरिषुपातमस्मरद् रमापतिं स परशुराममादरात् ।
स राजकेळ्युरुकदळीसहस्रकं तदाऽऽददत्त्यवसितिदत्तमुत्तमम् ॥ १०.५१ ॥

स शंकरपदद्विजोपहृतमाप्य गोवाख्यगां
गरिष्ठकदळीलसद्दशशतीचतुष्कं चरन् ।
पयः कलशपंचकत्रिकयुगाभिपूर्णं पपौ अदृष्टगतिरप्यभून्नृपनृमंडलैरुद्यतैः ॥
१०.५२ ॥

अयमेव गोविषयतोऽपि सदसि जनतार्थितो जवात् ।
पुष्पमुत फलमहो विदधे जनसुप्तिदानुपमगानसंपदा ॥ १०.५३ ॥

धन्योऽमह्यत नाकिनामहितहृद्बाणस्समोऽजस्ययो मध्वो ध्वस्तदुरागमोऽग्र्यहिमगुश्रीः
काममायामिहृत् ।
विष्णुं विश्वजयप्रदं स हि नमन् सेव्यं सुसौख्यं मुदा दाक्ष्याच्छ्रीधरमामयादिविरही
योगी सुहृत् सर्वदा ॥ १०.५४ ॥

इति भुवनविभूषणस्य भूयां स्यविगणितानि कृतांतराणि हंत ।
श्रवणमननकीर्तनैरभीष्टं प्रतिददतीत्यमराः प्रकीर्तयंति ॥ १०.५५ ॥

इति विविधगोधारावारैर्विशारदवारिदो
हरिपदरतो विद्याविद्युत्प्रदीपितदिङ्मुखः ।
भवभयमहाघर्मोत्तप्तं सदंघ्रिपमंडलं
सफलसुमनः सांद्रानंदं व्यधादविपल्लवम् ॥ १०.५६ ॥

॥ इति श्रीमत्कविकुलतिलक त्रिविक्रमपंडिताचार्यसुत
श्रीनारायणपंडिताचार्यविरचिते श्रीमध्वविजये
आनंदांकिते दशमः सर्गः ॥

www.yousigma.com